# Shri Bala Ashtottararashata Namavali 2

# શ્રીબાલાષ્ટોત્તરશતનામાવલિઃ ૨

## Document Information

Text title : Shri Bala Ashtottarashata Namavali 2

File name : bAlAShTottarashatanAmAvaliH2.itx

Category : devii, dashamahAvidyA, devI, aShTottarashatanAmAvalI

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

# શ્રીબાલાષ્ટોત્તરશતનામાવલિઃ ૨

ૐ ઐં હ્રીં શ્રીં શ્રીબાલાયૈ નમઃ । શ્રીમહાદેવ્યૈ નમઃ ।
શ્રીમત્પઞ્ચાસનેશ્વર્યૈ નમઃ । શિવવામાઙ્ગસમ્ભૂતાયૈ નમઃ ।
શિવમાનસહંસિન્યૈ નમઃ । ત્રિસ્થાયૈ નમઃ । ત્રિનેત્રાયૈ
નમઃ । ત્રિગુણાયૈ નમઃ । ત્રિમૂર્તિવશવર્તિન્યૈ નમઃ ।
ત્રિજન્મપાપસંહર્ત્ર્યૈ નમઃ । ત્રિયમ્બકકુટુમ્બિન્યૈ નમઃ ।
બાલાર્કકોટિસઙ્કાશાયૈ નમઃ । નીલાલકલસત્કચાયૈ નમઃ ।
ફાલસ્થહેમતિલકાયૈ નમઃ । લોલમૌક્તિકનાસિકાયૈ નમઃ ।
પૂર્ણચન્દ્રાનનાયૈ નમઃ । સ્વર્ણતાટઙ્કશોભિતાયૈ નમઃ ।
હરિણીનેત્રસાકારકરુણાપૂર્ણલોચનાયૈ નમઃ । દાડિમીબીજરદનાયૈ
નમઃ । બિમ્બોષ્ઠ્યૈ નમઃ । ૨૦॥

મન્દહાસિન્યૈ નમઃ । શઙ્ખગ્રીવાયૈ નમઃ ।
ચતુર્હસ્તાયૈ નમઃ । કુચપઙ્કજકૂડ્મલાયૈ નમઃ ।
ગ્રૈવેયાઙ્ગદમાઙ્ગલ્યસૂત્રશોભિતકન્ધરાયૈ નમઃ ।
વટપત્રોદરાયૈ નમઃ । નિર્મલાયૈ નમઃ । ઘનમણ્ડિતાયૈ નમઃ ।
મન્દાવલોકિન્યૈ નમઃ । મધ્યાયૈ નમઃ । કુસુમ્ભવદનોજ્જવલાયૈ
નમઃ । તપ્તકાઞ્ચનકાન્ત્યાઢ્યાયૈ નમઃ । હેમભૂષિતવિગ્રહાયૈ
નમઃ । માણિક્યમુકુરાદર્શજાનુદ્વયવિરાજિતાયૈ નમઃ ।
કામતૂણીરજઘનાયૈ નમઃ । કામપ્રેષ્ઠગતલ્પગાયૈ નમઃ ।
રક્તાબ્જપાદયુગલાયૈ નમઃ । ક્વણન્માણિક્યનૂપુરાયૈ
નમઃ । વાસવાદિદિશાનાથપૂજિતાઙ્ઘ્રિસરોરુહાયૈ નમઃ ।
વરાભયસ્ફાટિકાક્ષમાલાપુસ્તકધારિણ્યૈ નમઃ । ૪૦॥

સ્વર્ણકઙ્કણજ્વાલાભકરાઙ્ગુષ્ઠવિરાજિતાયૈ નમઃ ।
સર્વાભરણભૂષાઢ્યાયૈ નમઃ । સર્વાવયવસુન્દર્યૈ નમઃ ।
એઙ્કારરૂપાયૈ નમઃ । ઐઙ્કાર્યૈ નમઃ । ઐશ્વર્યફલદાયિન્યૈ
નમઃ । ક્લીઙ્કારરૂપાયૈ નમઃ । ક્લીઙ્કાર્યૈ નમઃ ।

ક્લૃપ્તબ્રહ્માણ્ડમણ્ડલાયૈ નમઃ । સૌઃકારરૂપાયૈ
નમઃ । સોઃ કાર્યૈ નમઃ । સૌન્દર્યગુણસંયુતાયૈ
નમઃ । સચામરરતીન્દ્રાણીસવ્યદક્ષિણસેવિતાયૈ નમઃ ।
બિન્દુત્રિકોણષટ્કોણવૃત્તાષ્ટદલસંયુતાયૈ નમઃ ।
સત્યાદિલોકપાલાન્તદેવ્યાવરણસેવિતાયૈ નમઃ । ઓડ્યાણપીઠનિલયાયૈ
નમઃ । ઓજસ્તેજઃસ્વરૂપિણ્યૈ નમઃ । અનઙ્ગપીઠનિલયાયૈ નમઃ ।
કામિતાર્થફલપ્રદાયૈ નમઃ । જાલન્ધરમહાપીઠાયૈ નમઃ । ૬૦ ॥

જાનકીનાથસૌદર્યૈ નમઃ । પૂર્ણાગિરિપીઠગતાયૈ નમઃ ।
પૂર્ણાયુઃસુપ્રદાયિન્યૈ નમઃ । મન્ત્રમૂર્ત્યૈ નમઃ । મહાયોગાયૈ નમઃ ।
મહાવેગાયૈ નમઃ । મહાબલાયૈ નમઃ । મહાબુદ્ધ્યૈ નમઃ ।
મહાસિદ્ધ્યૈ નમઃ । મહાદેવમનોહર્યૈ નમઃ । કીર્તિયુક્તાયૈ
નમઃ । કીર્તિધરાયૈ નમઃ । કીર્તિદાયૈ નમઃ । કીર્તિવૈભવાયૈ
નમઃ । વ્યાધિશૈલવ્યૂહવજ્રાયૈ નમઃ । યમવૃક્ષકુઠારિકાયૈ
નમઃ । વરમૂર્તિગૃહાવાસાયૈ નમઃ । પરમાર્થસ્વરૂપિણ્યૈ નમઃ ।
કૃપાનિધયે નમઃ । કૃપાપૂરાયૈ નમઃ । ૮૦ ॥

કૃતાર્થફલદાયિન્યૈ નમઃ । અષ્ટાત્રિંશત્કલામૂર્ત્યૈ નમઃ ।
ચતુઃષષ્ટિકલાત્મિકાયૈ નમઃ । ચતુરઙ્ગબલાદાત્ર્યૈ નમઃ ।
બિન્દુનાદસ્વરૂપિણ્યૈ નમઃ । દશાબ્દવયસોપેતાયૈ નમઃ ।
દિવિપૂજ્યાયૈ નમઃ । શિવાભિધાયૈ નમઃ । આગમારણ્યમાયૂર્યૈ નમઃ ।
આદિમધ્યાન્તવર્જિતાયૈ નમઃ । કદમ્બવનસમ્પન્નાયૈ નમઃ ।
સર્વદોષવિનાશિન્યૈ નમઃ । સામગાનપ્રિયાયૈ નમઃ । ધ્યેયાયૈ
નમઃ । ધ્યાનસિદ્ધાભિવન્દિતાયૈ નમઃ । જ્ઞાનમૂર્ત્યૈ નમઃ ।
જ્ઞાનરૂપાયૈ નમઃ । જ્ઞાનદાયૈ નમઃ । ભયસંહરાયૈ નમઃ ।
તત્ત્વજ્ઞાનાયૈ નમઃ ॥ ૧૦૦ ॥

તત્ત્વરૂપાયૈ નમઃ । તત્ત્વમય્યૈ નમઃ । આશ્રિતાવન્યૈ
નમઃ । દીર્ઘાયુર્વિજયારોગ્યપુત્રપૌત્રપ્રદાયિન્યૈ નમઃ ।
મન્દસ્મિતમુખામ્ભોજાયૈ નમઃ । મઙ્ગલપ્રદમઙ્ગલાયૈ નમઃ ।
વરદાભયમુદ્રાઢ્યાયૈ નમઃ । બાલાત્રિપુરસુન્દર્યૈ નમઃ ॥ ૧૦૮ ॥

ઇતિ શ્રીબાલાષ્ટોત્તરશતનામાવલિઃ (૨) સમાપ્તા ।

Proofread by PSA Easwaran

*Shri Bala Ashtottarararashata Namavali 2*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*